Durga Suktam

दुर्गासूक्तम्

MANTRA · मन्त्र

1 जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥ १॥

Jatavedase sunavama somam aratiyato nidahati vedah.
Sa nah parshad ati durgani vishva naveva sindhum duritaty agnih.

2 तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः॥ २॥

Tam agni varnam tapasa jvalantim vairochanim karma phaleshu jushtam.
Durgam devi sharanam aham prapadye sutarasi tarase namah.

3 अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥ ३॥

Agne tvam paraya navyo asman svastibhir ati durgani vishva
Push cha prithvi bahula na urvi bhava tokaya tanayaya shanyoh.

4 विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम्॥ ४॥

Vishvani no durgaha jatavedah sindhum na nava duritati parshi.
Agne atrivan manasa grinanosmakam bodhy avita tanunam.

5 पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात्।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः॥ ५॥

Pritanajita sahamanam ugram agni huvema paramat sadhasthat.
Sa nah parshad ati durgani vishva kshamad devo ati duritaty agnih.

6 प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यंश्च सत्सि।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व॥ ६॥

Pratnoshi kam idyo adhvareshu sanach cha hota navyansh cha satsi.
Svam chagne tanuvam piprayasvasmabhyam cha saubhagam ayajasva.

7 गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्॥ ७॥

Gobhir jushtam ayujo nishiktam tavendra Vishnor anusancharema.
Nakasya prishtham abhi sanvasano vaishnavim loka iha madayantam.

Text checked against: Swami Vimalananda (ed., tr.), Mahanarayanopanisad, Sanskrit text with Sayana-based commentary and English translation, Sri Ramakrishna Math, Madras, 1986. Meanings, audio and all scripts at nityapaath.com/durga-suktam/